श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

# ॥ समाख्यापद्धतिः द्वितीया ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

# ॥ समाख्यापद्धतिः द्वितीया ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

वन्दे विष्णुपदासक्तं तमृषिं ताञ्च पादुकाम्।
यथार्था शठजित्संज्ञा मच्चित्तविजयाद्ययोः ॥ **2.1** ॥

द्रमिडोपनिषन्निवेशशून्यान्
अपि लक्ष्मीरमणाय रोचयिष्यन्।
ध्रुवमाविशति स्म पादुकात्मा
शठकोपः स्वयमेव माननीयः ॥ **2.2** ॥

नियतं मणिपादुके ! दधानः
स मुनिस्ते शठकोप इत्यभिख्याम्।
त्वदुपाश्रितपादजातवंश -
प्रतिपत्त्यै परमाततान रूपम् ॥ **2.3** ॥

मुनिना मणिपादुके ! त्वया च
प्रथिताभ्यां शठकोपसंज्ञयैव।
द्वितयं सकलोपजीव्यमासीत्
प्रथमेन श्रुतिरन्यतस्तदर्थः ॥ **2.4** ॥

आकर्ण्य कर्णामृतमात्मवन्तो गाथासहस्रं शठकोपसूरेः।
मञ्जुप्रणादां मणिपादुके ! त्वाम् तदेकनामानमनुस्मरन्ति ॥ **2.5** ॥

यः सप्तपर्वव्यवधानतुङ्गां
शेषत्वकाष्ठामभजन्मुरारेः।
तस्यापि नामोद्वहनात् त्वयाऽसौ
लघूकृतोऽभूच्छठकोपसूरिः॥ **2.6** ॥

शय्यात्मना मधुरिपोरसि शेषभूता
पादाश्रयेण च पुनर्द्विगुणीकृतं तत्।
भूयोऽपि भागवतशेषतया तदेव
व्यङ्क्तुं पदावनि ! शठारिपदं बिभर्षि॥ **2.7** ॥

पद्येन देवि ! शठकोपमुनिस्तवासीत्
तस्यापि नामवहनान्मणिपादुके ! त्वम्।
शेषी बभूव युवयोरपि शेषशायी
शेषं त्वशेषमपि शेषपदे स्थितं वः॥ **2.8** ॥

विन्ध्यस्तम्भादविहतगतेर्विष्वगाचान्तसिन्धोः
कुम्भीसूनोरसुरकबलग्रासिनः स्वैरभाषा।
नित्यं जाता शठरिपुतनोर्निष्पतन्ती मुखात् ते
प्राचीनानां श्रुतिपरिषदां पादुके ! पूर्वगण्या॥ **2.9** ॥

शठकोप इति समाख्या तव रङ्गधुरीणपादुके ! युक्ता।
सूते सहस्रमेवं सूक्तीः स्वयमेव यन्मया भवती॥ **2.10** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे समाख्यापद्धतिः द्वितीया॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥